॥ श्रीः ॥

पुस्तक संख्या ...
विषय ...

स्वर्ग-सन्देशः



समीक्षाचक्रवर्त्ति—

स्व० पं० मधुसूदनशर्म्म मैथिलः ।

अमन्तरण
21.11.93
श्री कुलिशानंद प्रेषित

॥ श्रीः ॥

* स्वर्गसन्देशः *

श्रीलाल शास्त्री शोध
पुस्तक संख्या ...
दिनांक ...

समीक्षाचक्रवर्ति, महामहोपदेशक, विद्यावाचस्पति
विद्वद्वर स्व० पण्डित श्रीमधुसूदनशर्म मैथिल

विरचितः

तत्सूनुना पं० श्रीप्रद्युम्नशर्म्मणा सम्पादितः ।

सोयं

जयपुरराज्यान्तर्गत मडरेलानगराधिपति माननीय ठाकुर
श्रीतख्तसिंहजीमहोदयेन
निजद्रव्येण मुद्रापयित्वा प्रकाशितः ।

प्रथमावृत्तिः ५००

वि० संवत् २००४

मूल्यम् ॥)

सर्वेधिकाराः सम्पादकाधीनाः ।

1 स्वर्गसंदेशात्तस्ते लेखां (?) रोचका दृष्टि । (?) ।१ क्रमांक २/३/६
२ विरुद्ध (?) रूप से का मतांत स्वर्गादि से वर्णितम् । ३/८२/३

३ देवासुरसंग्रामे विष्णो न एके प्रदर्शिता । सोमे विरोध्य उर्वी । (अथर्व २५ द)
४ अतोरात्रं वाऽहो रात्रे: (अथर्व ६ स पृष्ठे)

॥ श्रीः ॥

भूमिका

यह ब्रह्म विज्ञान के आध्यात्मविभाग दिव्य विभूति का **स्वर्ग-संदेश** नामक पुस्तक स्वर्ग के विषय में लिखा गया है। इसमें भौम स्वर्ग, दिव्यस्वर्ग, पितृस्वर्ग और देवस्वर्ग ये चार प्रकार के स्वर्ग बतलाये गये हैं, जिनके विवरण बहुत स्पष्ट शास्त्र के प्रमाणों से दिखाये गए हैं। पुस्तक छोटा परन्तु बड़ा ही सारगर्भित है।

इन्द्र विजय, जगद्गुरु वैभव और स्वर्ग सन्देश इन तीनों पुस्तकों से प्राचीन समय का पूर्ण दिग्दर्शन होता है। जो विषय लुप्तप्राय होगया था उस को बहुत ही सुस्पष्ट किया गया है।

इस पुस्तक के मुद्रित कराने का श्रेय श्रीमान् ठाकुर **तखतसिंहजी** महोदय मडरेला के सरदार को है। ठाकुर साहब बड़े विद्याप्रेमी हैं, संस्कृत में भी अच्छा अभ्यास है। आपका अधिकसमय शास्त्रीय पुस्तकों के अवलोकन में ही व्यतीत होता है। संस्कृत गद्य में स्वामिभक्ति नाम की एक ऐतिहासिक और पद्यमें एक शिवस्तुति पुस्तक आपने अभी प्रकाशित कराई है। आप सज्जन, सुशील और पक्के सनातन धर्मावलम्बी हैं और रहन सहन भी सादगी का है। आपको सिवाय विद्याध्ययन के और कोई व्यसन नहीं है।

स्वर्गीय श्रीमान् ठाकुर साहब **भूरसिंहजी** महोदय मलसीसर सरदार के आप कनिष्ठ सुपुत्र हैं। इनके जेष्ठ भ्राता ठा० शिवनाथसिंह जी महोदय जो संप्रति मलसीसर के अधिनायक हैं उन्हें भी बड़ा विद्यानुराग है,यह भी सन् १९२८ ई० में पूज्य पिताजी का एक ग्रन्थ"स्मार्तकुण्ड समीक्षाध्याय" प्रकाशित करा चुके हैं।

परमेश्वर ऐसे क्षत्रियोचित धर्म के पालन करने वाले ठाकुरसाहब को चिरायु तथा सुखी रक्खें। जिस से विद्या की उन्नति होकर देश को लाभ पहुँचे।

ठाकुर साहब की पूज्य पिताजी पर पूर्ण भक्ति और इस लेखक पर पूर्ण प्रेम सदैव से है। मैं आपका बड़ा कृतज्ञ हूँ।

विद्याधर रोड
जयपुर सिटी।
५-१०-४७


प्रद्युम्न शर्म्मा ओझा।

॥श्रीः॥

विषय-सूची ।

विषय		पृष्ठ
१— प्रजापति कृता चित्याग्निरूप पृथ्वी सृष्टिः	... ...	१
२— अधिदैवतं ब्रह्मकृतायां सप्तविध लोक सृष्टौ तृतीयस्य सूर्य लक्षित लोकस्य स्वर्गत्वम्		४
३— भूमौ सुमेरु संस्थानस्यस्वर्गत्वम् तदनुगतानि च पर्वतानां, नदीनां, वनानां, पुराणां, समुद्राणां च संस्थानानि		६
४— भूमौ सुमेरोः प्रागुत्तरतो देव लोक लक्षणो भौमः स्वर्गः		६
५— त्रिविधं देवयजनम्-त्रिणाकः, त्रिदिवः, त्रिविष्टपम्		६
६— भौमस्वर्गे यज्ञार्थं कुरुक्षेत्रे देवयजनं नाको ब्रध्नस्य विष्टपं च ...		८
(१— पृथ्व्यां स्वर्गो नाको ब्रध्नस्य विष्टपं च)		१०
(२— कुरुक्षेत्रम्)		१२
७— मनुष्य देवाः		१३
(१— देवासुराणां द्वादश महा संग्रामाः)		१३
८— भौम स्वर्ग वासिनो देवाः षोढाविभक्ताः १ अग्निः, २ आग्नेयवायुः, ३ सूर्यः, ४ चन्द्रः ५ चान्द्रवायुः, ६ वरुणः		१४
(दश लोकपालाः दिक्पालाः)		१५
९— भौमद्यवि षड् विभागाः (मेरोरंशाः ३-९-१५-२१-२७-३३) ...		१७
१०— सौरे दिव्यस्वर्गे पितृ स्वर्गः		१७
११— सौरे दिव्यस्वर्गे पितृस्वर्ग प्रापकाश्चतुर्विधाः पितृयाणमार्गाः ...		१८
१—नाड्यः		१८
२—कर्माणि		१९
३—व्योमः		१९
४—अति वाहिकाः		१९
१२— सौरे दिव्यस्वर्गे सप्त देवस्वर्गाः (१८-१९-२०-२१-२२-२३-२४) ...		१९
(१—दिव्यस्वर्गेच भौमस्वर्गेच सप्त देव लोकाः		२०

विषय					पृष्ठ
१३— देवस्वर्गे प्रपकाश्चतुर्विधा देवयान मार्गाः...	...	....			२१
(१—अर्य्यमा वरुणौ देवयान मार्गस्याध्यक्षौ)	...	...			२१
(२—भौम स्वर्गं प्रापका भौमा देवयान मार्गाः)	...	...			२३
१४—भौमस्वर्गे सुधर्मासभायां दशदिक्पालाः शासनव्यवस्थापकाः—				...	२५
१५—प्रजाशासने प्रजाभ्यो राजकीया अन्नदानादि व्यवस्था			...	...	२५
१६—अन्नवस्त्रादि नगर व्यवस्था	...	...	...		२६
१७—प्रेषितेभ्यः स्वर्णेभ्यो गृहव्यवस्था	...	....	...		२६
१८—मार्गेषु यातृनां सायं प्रातर्यातायात व्यवस्था		...	...		२६
१९—स्वर्गे गन्तृणां सौधन्व निर्मितानि विभागादीनि आदिष्टोपयोज रूपाणि शिल्पानि					२६
२०—सावित्र वारुणभेदात्स्वर्गे दुङ्कृत द्वे विध्यम्		...	...		२७
२१—अश्मा पृश्निः धरुणः ...	...	...	...		२७
उक्षा ...	...	...	...	...	२८
अरुषः ...	...	...	...	...	२९
२२—प्रेङ्खः ...	...	...	...	...	३०
२३—भौमस्वर्गे अरालसमुद्रे महीसागरे च समुद्रमन्थन महारम्भः				...	३१
२४—देवस्थानस्यासुरै र्विजतत्वात तुरुष्क (तातार = तारतरी) स्थानत्वम्				...	३१



पुस्तक संख्या .....
क्रमांक .....

❀ श्रीः ❀

स्वर्गसन्देशः

१–प्रजापतिकृता चित्याग्निरूप पृथ्वीसृष्टिः ।

यदक्षरं पञ्चविधं समेति युजो युक्ता अभि यत् संवहन्ति ।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकी भवन्ति ॥ १ ॥

१– पञ्चाक्षरो यः पुरुषः सृजत्यवति हन्ति सः ।
ब्रह्मा तत्राक्षरः पूर्वं इन्द्र विष्णवग्नि सोमयुक् ॥ २ ॥
इन्द्रविष्णू नियन्तारौ द्यौ भूत हृदि स्थितौ ।
अग्नीषोमौ तत्र पृथ्व्यौ शरीरं सृजतः सह ॥ ३ ॥
अवर ब्रह्मणः सोऽयं पुरुषः प्रकृते र्वशात् ।
ससर्ज सृष्टिं प्रकृतेश्चातुर्विध्याच्चतुर्विधाम् ॥ ४ ॥
प्राणश्चापश्चवाक् चायमन्नान्नाद इति क्रमात् ।
चतुर्मुखोऽयमवर ब्रह्मा प्रकृति रुच्यते ॥ ५ ॥
प्राणेन वेदानद्भिस्तु लोकान् वाचा प्रजा इमाः ।
अन्नान्नादेन चैतेषां प्रतिष्ठा असृजत प्रभुः ॥ ६ ॥
स्वयम्भूः परमेष्ठी च सूर्यः पृथ्वी च चन्द्रमाः ।
एताः प्रतिष्ठाः सर्वासां प्रजानां भिन्नवत् कृताः ॥ ७ ॥
तासु पृथ्व्याः प्रतिष्ठायाः सृष्टिरत्र प्रदर्श्यते ।
अस्यां विशिष्य भूतानि प्रतितिष्ठन्त्यशेषतः ॥ ८ ॥

२– यस्तावदक्षरः कश्चिदग्निः स पुरुषोऽमृतः ।
सर्वसाधारणः सोऽयमृते तेनास्ति किञ्चन ॥ ९ ॥

सप्तर्षि—प्राणतः सोऽभूत् पुरुषः सप्तपूरुषः ।
स प्रजापति रित्युक्तः सर्वसृष्टि प्रवर्तकः ॥१०॥
सोऽन्नादाग्निमवष्टभ्य प्रकृतिं स्वां सिसृक्षया ।
तत्र शुक्रत्रयं सिञ्चन् पृथिवी मुदपादयत् ॥११॥
यथा स्वयम्भूः प्राणाग्निर्वागग्ने र्भास्करोयथा ।
यथान्नादाग्नितः पृथ्वो रूपज्योति रसृज्यत ॥१२॥
तत्र तत्र प्रकृत्यग्नौ वागापोऽग्निरिति त्रयम् ।
क्रमेण शुक्रमासिच्य पिण्डं जनयति द्विधा ॥१३॥

३— इह सृष्टिषु सर्वासु प्राणात् प्रथमतः सदा ।
शुक्रं प्रथमजं ब्रह्म त्रयी वागेव जायते ॥१४॥
त्रय्या मस्यां प्रतिष्ठाया मेषतिष्ठन् प्रजापतिः ।
वाचं यजुरुपादाय सोऽपोऽसृजत वाक्परा: ॥१५॥
अन्नादाग्नि मुखो ब्रह्मा सम त्रय्याऽप्सु चाविशत् ।
अकायमव्रणं तत्र शुद्धं शुक्रं सपर्य्यगात् ॥१६॥
तेनेयं शुक्रवाक् तत्र सत्येऽग्नौ समभूद् ऋता ।
अन्नादाग्नि ब्रह्ममयी सावागियमभून्मही ॥१७॥
प्राणाग्निर्व्यभवन् तत्र प्राणे तत्र हिते पुनः ।
देवाग्निः पञ्चचितिभिः पञ्चदेवैश्चितोऽभवत् ॥१८॥
अग्निः प्रजापतिर्भिन्नो भिन्नो देवाग्निरर्चितः ।
भिन्नोऽप्यभिन्न उभयः स इन्द्राविष्णु कर्म्मणा ॥१९॥

४— अग्निनाग्निः समिद्धोऽभूत् तत आपइहाप्नुवन् ।
अर्पा गवां त्रिस्तग्तो योगाद् वाक् पृथ्व्यभूदियम् ॥२०॥
अग्नौ ब्रह्मणि चान्नादे वागापोऽग्निरिति त्रयम् ।
शुक्रं मर्त्यं चितं भूत्वा पिण्डत्व मसृजद् भुवः ॥२१॥

गवां त्रयः स्तरा वाचः शुक्लोऽन्तर तमः स्तरः ।
अपां कृष्णः स्तरोमध्ये ततः पृश्निर्बहिःस्तरः ॥२२॥
स्वयं भू रस आयाति वाचः सर्वान्तर स्तरः ।
पारमेष्ठ्यो रसः कृष्णो योऽङ्गारे भसितोपरि ॥२३॥
पृश्निर्गौः सप्तवर्णात्मा सप्तभिः सूर्य्यरश्मिभिः ।
तदुत्क्रान्तौ पारमेष्ठ्यो गौः कृष्णोऽङ्गार ईक्ष्यते ॥२४॥
तदुत्क्रान्तौ स्वयंभूर्गौः शुक्लोभसित ईक्ष्यते ।
वाचः शुक्लोऽथ कृष्णोऽपां पृश्निरग्नेर्गवांस्तरः ॥२५॥
इत्थं पृथिव्यां वाचोऽपामग्ने र्गोभिःस्तरास्त्रयः ।
ऊर्ध्वाधर क्रमस्तेभ्यो ब्रह्मभ्योऽस्यां तदागमात् ॥२६॥

❋ इति प्रजापतिकृता चित्याग्निरू।। पृथ्वीसृष्टिः ❋

२—आधिदैवतं ब्रह्मकृतायां सप्तविधलोकसृष्टौ तृतीयस्य सूर्य्य-लक्षित लोकस्य स्वर्गत्वम्।

चितेनिधेय ममृतं वागापोऽग्निरिति त्रयम्।
प्रजापतौ चितं भूत्वा ततो विस्रंसते पुनः ॥२७॥
प्रजापतिः प्राणघनो यावदात्मनि सोऽव्यये।
कृतात्मा विद्यया त्रय्या तावत् तत्रोपपद्यते ॥२८॥
तद् ब्रह्म विष्ठितं यावत् तावती शुक्रवागिह।
ऋग्यजुः सामतः प्राणः परोनेति न शुक्रवाक् ॥२९॥
अग्नेरपांच वाचश्च गावो नाम विभक्तयः।
परितो हृदयादुत्थात् सन्तिव्याप्ताः सहस्रधा ॥३०॥
आपो गावः सहस्रंताः कल्पन्ते यावदात्मनि।
गवां त्रिंशदहः संज्ञा त्रयस्त्रिंशदहान्यतः ॥३१॥
अष्टा चत्वारिंशतोऽह्नां वागह्नोति प्रजापतौ।
आपस्त्रयस्त्रिंशताह्नामग्निरित्येक विंशतौ ॥३२॥
इत्थं शुक्रेणामृतेन पृथ्वीयं प्रथिता दिवि।
शुक्रत्रय वशादस्यां त्रिलोकी त्रिविधाऽभवत् ॥३३॥
अग्नित्रिलोकी प्रथमाद्वितीया तु त्रिलोक्यपाम्।
उत्तमा वाङ्मयी लोकास्त्रयस्ते त्रिवृतस्ततः ॥३४॥
त्रिलोकी रोदसी पूर्वा द्वितीया क्रन्दसी मता।
तृतीया संयतीत्येव लोकोयं प्रथते त्रिधा ॥३५॥
त्रिष्वप्येतेषु लोकेषु पुनस्त्रेधा विभक्तयः।
पृथ्व्यन्तरिक्षं द्यौरित्थमग्न्यादीनामवस्थया ॥३६॥
भूर्भुवः स्वरियं पृथ्वी स्वर्महर्जनदान्तरम्।
जनत्तपः सत्यमिति द्यौरित्थं त्रय मेवत्रा ॥३७॥

पृथ्वी लोको घनत्वेन द्योलोको विरलत्वतः।
मध्यास्थितिस्त्वन्तरिक्षमेतत् त्रैलोक्य मुच्यते ॥३८॥
निविडत्वं तरलता विरलत्वमितिक्रमात् ।
पृथक् त्रिलोकी शुक्राणामवस्थाभेदतोऽभवत् ॥ ३९ ॥
द्यौः पृथ्वीति द्विधा कल्पौ यत् सूर्य्य परमेष्ठिनौ।
तेन द्वयोर्विघटनात् लोकाः सप्तैव निश्चिताः ॥ ४० ॥
त्रयो वा + सप्त वा लोकास्तदित्थमधिदैवतम् ।
उक्ता अथान्यथा लोकान् कल्पन्ते भुव्यपि त्रिधा ॥ ४१ ॥
तत्राधिदैविकं स्वर्गः पृथ्व्यां तावत् प्रदर्श्यते ।
त्रयस्त्रिंशत् स्तोमवती पृथ्वीयमवधार्य्यताम् ॥ ४२ ॥

+ ७	द्यौः	स	द्यावापृथिवी
६	अं	त	
५	पृ० द्यौः	ज	अन्तरी
४	अं	म	
३	पृ० द्यौः	स्व	रोदसी
२	अं	भु	
१	पृ०	भू	

३—भूमौ सुमेरु संस्थानस्य स्वर्गत्वम् तदनुगतानि च पर्वतानां नदीनां वनानां पुराणां समुद्राणां च संस्थानानि ।

... ...
....
... .
... ...
....
... .

४—भूमौ मेरोः प्रागुत्तरतो देवलोकाः ।

यन्नाकपृष्ठं त्रिदिवं त्रिविष्टपं स्वर्गं च भूमौ प्रविदुर्विपश्चितः ।
ते देवलोका इतएव मेरुतः स्युरुत्तरस्यां दिशि धातृकल्पिताः ॥१॥

५—त्रिविधं देवयजनम् ।

वृत्तस्य यद्वि विष्टपमत्र मध्यतः कल्पते षडंशान्तरिते धरातले ।
विधाय दैवं यजनं त्रिधा पुनस्तत्रैव यज्ञानयजन्त याज्ञिकाः ॥१॥
बालकाश सरसस्तु यानदीलयारण्यया वहति पूर्वतस्ततः ।
तत्सरोऽनुगत सप्तसिन्धुतः सन्निधौ हि सरसस्तु पार्श्वतः ॥२॥
भूमध्यरेखोपरि सप्तचत्वारिंशन् मिताञ्चांश समे प्रदेशे ।
पूर्वत्र नद्या च यथा च युक्ते यज्ञानुकूले च समे समूले ॥३॥
अस्त्युन्नतं भूमितलं सुमेरूच्चांशाभिधं प्रागुपमेरुतस्तत् ।
नवांश पञ्चाशसमं तदासीत्सुचारु दैवं यजनं निगूढम् ॥४॥

यज्ञाः सवा भूरिश एव तत्र तैः साध्यैः पुरा नाकनिकेतनैः कृताः ।
तत्रैव पश्चादसुरैरुपद्रुता देवाः सहेन्द्रा अयजन्त चाखिलाः ॥ ५ ॥
नदस्य सिन्धो रुभयोस्तु पार्श्वयो र्याः सिन्धवः स्ताः सुनिरूपिता यथा ।
तथैव नाकस्थित सिन्धवो प्यमूर्मन्ये श्रुतौ तैः प्रथमैः परिष्टुताः ॥६॥
"यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत् सर्त्तवे सप्तसिन्धून् ।
यो रौहिण मस्फुरद् वज्रबाहु र्द्यां मारोहन्तं स जनास इन्द्रः,, ॥ ७ ॥
(ऋ० म०२अ०२सू०१२)
"पञ्चनद्यः सरस्वति मपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित्,, ॥८॥ (तजु० ३।४।२)
"उतनः प्रियाः प्रियासु सप्तस्वसासुजुष्टा सरस्वती स्तोम्याऽभूत् ।
इमा जुह्वाना युष्मदानभोभिः प्रतिस्तोम सरस्वति जुषस्व"॥९ (तै०ब्रा०२।४।६)
सरस्वतीयं सहि बालकाशः संभाव्यते तत्र हि पञ्चनद्यः ।
इली च लिप्साऽकसु कोकसू च सर्क्यू श्च सस्रोतस आवहन्ति ॥१०॥
वस्कान नद्या, करताल नद्या, वियेनया, सप्त च ताविनेलीम् ।
तत्रासुरं रौहिणमेष इन्द्रोऽवधीद् गतं यज्ञविघातिनं प्राक् ॥ ११ ॥
यद् बालकाशादथ षड्भिरंशकै रुदक्स्थल यत्र तु संप्रति स्थितम् ।
ओमस्क नाम्ना नगरं तदन्तिके सरस्तटेऽभूदपि यज्ञकेतनम् ॥१२॥
षड्भिस्तथांशै रित उत्तरांचिता वक्षांशके षष्ठमिते तृतीयकम् ।
प्रक्लृप्त +मोवी सरितोऽन्तिके तटे यज्ञस्थलं तत्त्रितयं समोत्तरे ॥१३॥
भूमध्यरेखा मनुभारतीमिदं यज्ञस्थलानां त्रितयं पुरास्थितम् ।
अध्यक्ष एषां प्रथमो विराडभून्नाकस्थितो विष्णुरयं ररक्ष तत् ॥१४॥
प्रथमं तु देवयजनं ब्राह्मं तेषां च मध्यमं दैवम् ।
उत्तम मथ वैराजं सर्वेषां वेश्वरो विष्णुः ॥ १५ ॥

+ इयमोवी नदी संस्कृत भाषायां भद्रानाम्नी गङ्गोच्यते ।

त्रिविष्टपं वा त्रिदिवं यथा वा तथा त्रिणाकं प्रवदन्ति केचित् ।
दैवानिमन्ये यजनानि तानि त्रीण्येव नाकास्त इमे त्रयः स्युः ॥१६॥
"यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधि ॥१७॥" (ऋ० ९।११३।९)

❀ अष्टाधिकै द्वे च शते सुमेरोः कोशाः पुराणादिव बालकाशम् ।
चतुः शतैः सप्तदशाधिकै स्तु क्रोशैर्द्वितीयं प्रथितं सुमेरोः ॥१८॥
षड्भिः शतैः साधिक पञ्चविंशाधिकैः सुमेरोः परतस्तृतीयम् ।
नाकश्चतुस्त्रिंशपराष्टशत्या क्रोशैस्तत स्तावति चाद्यमेरुः ॥१९॥

६—भौमस्वर्गे यज्ञार्थं कुरुक्षेत्रे देवयजनं नाको ब्रध्नस्य विष्टपं च ।

(दिव्यस्वर्गे नाको ब्रध्नस्य विष्टपं च)

यत्क्रान्तिवृत्तस्य खपृष्ठकेन्द्रकं कदम्बकं तत्सुधियोऽद्य चक्षते ।
स एष नाकः प्रथितः पुरायुगे स्वर्गं प्रदेशस्थ स नाभि रिष्यते ॥२०॥
अनन्तनागस्य दिविष्ठ मूर्त्तेः पूर्वार्द्धकायस्य च वक्र भावात् ।
तत्कुण्डलस्यान्तरतः प्रदेशे शक्योऽम्बरे लक्षयितुं स नाकः ॥२१॥
ध्रुवाच्चतुर्विंश मितांशमण्डले लङ्कास्थ माध्याह्निकरेखया पुतिः ।
यत्रास्ति तत्रैव सा नाक इष्यते परोरजा अस्ति तदूर्ध्वतः क्वचित्॥२२॥
एवं विदुर्येतु महर्षय स्ते रिष्टो दिवः पृष्ठगतोऽमृतोऽर्थः ।
परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्ति ॥२२॥

अत्क = वरदी पोशाक । [illegible]

❀ सप्तवै देवलोकाः । ऐ० ब्रा० ७।११ (१७।२) त्रयोवा इमे त्रिवृतो लोकाः । ७।९४। सहस्राश्वीने वा इतः स्वर्गोलोकाः । ऐ०ब्रा० ७अ०९। एके नाह्नायावन्त मध्यानमश्यो गच्छति स एकाश्वीनोऽध्वा । सहस्रेणाह्नां गम्योऽध्वा स्वर्गलोकस्य । स्वर्गोवैलोको दूरोहणम् । यदेवदूरोहणम् असौवैदूरोवैदूरोऽदोयोऽसौ तपति । कश्चिद्वात्र गच्छति । ऐ०ब्रा० १८।४ (१८।७) ॥

अत्कः - इण् गतौ का पा शल्याद्रि मार्च्छ-यः कन् (उणादिपं; ३।४३)
दयानन्दः - अत्कः पाशीनो वा शरीरावयवो वा ।

दिव्यः स नाको दिवि भात्यलक्षणः कामप्रलोकं तत आहुरूर्ध्वतः ।
सूर्य्यस्य खस्वस्तिक मे तदिष्यते ततो नवत्यंशपथेऽस्ति भू भ्रमः ॥२४॥
रविः परिक्रामति वत्सरे भुवं भूर्वा परिक्रामति वत्सरे रविम् ।
न संशयोऽयं क्रियतां भुवो भ्रमोऽहोरात्रवादे गदितः श्रुतेर्मते ॥२५॥
कदम्बकं तत्परधाम कथ्यते यज्ञस्य विष्णो रथ तज्जिनांशतः ।
यद्वृत्त मुत्पद्यत एतदन्तरे द्यौ र्यावती स्वर्गमिमं प्रचक्षते ॥२६॥
यः कान्तिवृत्तस्य हि पृष्ठकेन्द्रो ध्रुवा ऋतुर्विंशति भागदूरे ।
वदन्तियं सांप्रतिकाः कदम्बं तत्संमुखे दक्षिणतोऽपि सोऽन्यः ॥२७॥
कदम्बयोः संपति मध्यगर्ते सूर्योऽय मिद्धः प्रतितिष्ठतीति ।
स्कम्भः कदम्बद्वययोजकोऽन्नज्योतिर्म्मयः स्वर्ग इति प्रतीयात् ॥२८॥
"दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशु पर्य्येति विश्वतः ।
सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः" ॥२९॥
"स्कम्भो दाधार द्यावापृथिवी उभेइमेस्कम्भो दाधारोर्वन्तरिक्षम् ।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कंभ इदं विश्वं भुवन माविवेश" ॥३०॥
(अथर्व० १०।४।१)

स्कंम्भोऽस्ति नाकद्वय संग्रहीता स्कम्भस्य नाभौ स्थित एष सूर्यः ।
पर्य्याप्य पृथ्वीमपि तत्प्रसारस्त्रैलोक्य मन्तर्हित मत्र विद्यात् ॥३१॥
स्वर्गः परे भा यत एष सूर्य्यो ध्रुवद्वयान्तः पृथिवी तु पृथ्वी ।
तयोस्तु मध्ये वियदन्तरिक्षं सूत्रं त्रयाणां नहनं सुषुम्णा ॥३२॥
द्यौ रेष आदित्य उतान्तरिक्षं वायु स्तथाग्निः पृथिवीति लोकाः ।
आत्मान एते भुवनाहिताः स्यु स्त एव सन्त्याहवनीय पूर्वाः ॥३३॥
स्वर्गं तु तत्रा हवनीय माहुः पृथ्वीं विदुस्तत्र च गार्हपत्यम् ।
धिष्ण्याग्नय स्तत्र तदन्तरिक्षं सोमात्मके स्कम्भ उपाहितास्ते ॥३४॥
अर्चींष्यह शुक्लदलोत्तरायणे संवत्सरोऽग्ने रिति पञ्च भूमिकः ।
वायुर्मरुत्वानथ सोमविद्युतौ वायोश्चतुर्भूमिक एष लोककः ॥३५॥

आदित्यलोकं वरुणात् तयैन्द्रतः प्रजापते रस्ति च भूमिका त्रयी ।
इत्थं विदुर्द्वादश भूमिकामयीं दिव्यत्रिलोकीं पथि देवयानके ॥३६॥
ब्रध्नस्य तद्विष्टप मस्ति यावा नादित्यलोकोऽथ तदन्तरेऽयम् ।
भात्यर्कबिम्बः खलु पृश्निरश्माः यथेह भौमश्चवि पृश्निरश्मा ॥३७॥
योऽध्रुवो योऽभिजिदन्तरं तयोः खं स्वर्ग एषोऽस्ति ततोऽधरे पुनः ।
कौषीतकः प्राह तदस्ति विष्टपं ब्रध्नस्य यत्र प्रतपत्यसौ रविः ॥३८॥
"अथो वै ब्रध्नस्य विष्टपं यत्रासौ तपति" । (कौ० ब्रा०१७।३)
मुखं च नासां च ललाटमित्थं त्रैलोक्य माख्याय ललाटतोऽर्वाक् ॥३९॥
यन्नाभिकाया विनतं तदाहु र्ब्रध्नस्य तद्विष्टपमैतरेयः (ऐ० आर० १।२)
इत्थं त्रिलोकी कथिता सुषुम्णा मार्गो हि तामुत्क्रममाण आत्मा ॥४०॥
अन्वेति केचित्पुनरन्तरिक्षं निरस्य लोकद्वयमित्थमाहुः ।
ध्रुवोऽभिजिद्द विष्णुपदं तु तत्र स ब्रह्मास्ति नाभ्युत्थित पद्ममध्यगः ॥४१॥
पृथ्व्येव पद्मं नु तदत्त कर्णिका प्राणं विदुर्ब्रह्म पदेन सर्जनम् ।
ब्रह्मा स पद्मस्थित एव विष्णुतो गायत्र भागान्तरतो दिवि श्रितः ॥४२॥
स नाकतोऽष्टास्वपि दिक्षु सञ्चरन् चिरेण विष्णोः कुरुते परिक्रमम् ।
ब्रह्मा ध्रुवोऽच्चोऽस्ति सवायु मूर्तिमानुत्थाय भूनाभित एत्युदग्दिशम् ।
मेरौ प्रतिष्ठाय स खंगतोध्रुवं पर्य्याय संभाति विचित्र तेजसा ॥४३॥

(पृथ्व्यां स्वर्गो नाको ब्रध्नस्य विष्टपं च)

दिवस्य नाकस्य च योऽपरक्षिते र्भागः स नाकः पृथिवीस्थ इष्यते ।
भौमोऽपि नाकः परधाम कथ्यते विष्णोर्विराजो भवदत्र हि स्थितिः ॥ १ ॥
व्यासार्द्धतः पार्थिवनाकविन्दोर्जिनांशतः कल्पितवृत्तमध्यम् ।
स्वर्ग प्रदेशः स हि भौम इष्टो ब्रह्मैकतो विष्णु रथैकतोऽस्य ॥ २ ॥
दैवाद्युगादप्यभवन् पुरायुगे पूर्वे तु साध्या इह वा समाश्रिताः ।
साध्यो परामे त्वयजन्त देवता स्तृतीययुग्या अपि यज्ञमीश्वरम् ॥ ३ ॥

"यज्ञेन यज्ञ मयजन्त देवा स्तानि धर्म्माणि प्रथमान्यासन् ।
तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥४॥"(यजु ३१।१६)
आखात मोर्वी सरितो यदुत्तरे सिन्धौ ततो दक्षिणतोऽति सन्निधौ ।
नाकः स षट् षष्टि मिताक्ष भागके भूमध्य रेखा मनु भारतीं स्थितः॥ ५ ॥
पञ्चत्रिंशत् क्रोशैः पादोनै रेक मक्षांशम् ।
प्रायेणाहुः किन्तुद्राघिम भागे समं सर्वम् ॥ ६ ॥
पाश्चात्य वैदेशिक मध्यरेखा रब्धे तु षट् सप्तति संमितेऽशे ।
ऊने कलाभि र्दशभिश्च पूर्व्ये नाकः स आसीद् भुवि पूर्वकाले ॥ ७ ॥
यमस्य देशे द्विशिराः पुरासीद् भेरुण्ड नामा शकुनः सदुष्टः ।
वेनं सुपर्णं तु हिरण्यपक्षं प्रतीच्यमैक्षन्त शुभायनाके ॥ ८ ॥
वेशं वसानो विहितं दधानः स्वमस्त्र मस्थादिह नाकदेशे ।
गन्धर्व एष स्व रिवेह यातान् प्रियैः प्रणामै रभिसत्करोति ॥ ९ ॥
"नाके सुपर्णं मुपयत् पतन्तं हृदा वेनन्तो अभ्यचक्षतत्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्॥१०॥ "(ऋ०१०।१२३।६
"ऊर्ध्वो गन्धर्वो अधिनाके अस्थात् प्रत्यङ् चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दशेकं स्वर्णं नाम जनत प्रियाणि ॥११॥"(ऋ.१०।१२३।७)
स्वर्ग प्रदेशस्य स एष नाको नाभिश्चतुर्दिक्षु ततो जिनांशैः [२४] ॥
स्वर्गः स चाभ्तन्तरतो दिवः स्या द्दिवं च तां स्वर्ग मुशन्ति भक्त्या ॥१२॥
ब्रह्माभिजित् संनिहितो ध्रुवो यदा यदाभवत् पूर्वयुगे सुरासुराः ।
[] वैकुण्ठ इन्द्रश्च तदा हिमाद्रितोऽप्युदङ् महीं स्वर्ग मशेषतो विदुः ॥१३॥
अक्षभ्रमोद्यद्वलयान्त रक्षिते मेर्वो रिदानींतन पूर्वकालयोः ।
व्यासोऽष्ट षष्ठानि शतानि षोडशक्रोशाः स हि स्वर्ग इह प्रधानतः ॥१४॥

[] भरद्वाजं प्रति भृगुरुवाच—(महाभारते शान्तिपर्वणि मोक्षधर्म्मे १९२ अ०)
उत्तरे हिमवत्पार्श्वे पुण्ये सर्व गुणान्विते ॥ पुण्यः क्षेम्यश्च काम्यश्च स परोलोक उच्यते ॥
स स्वर्ग सदृशो देशस्तत्र युक्ताः शुभागुणाः॥ काले मृत्युः प्रभवति स्पृशन्ति व्याधयो न च ॥

स्वर्गो यथा दीव्यत एव लक्षितः स्वर्गः समौमोऽथ च दिव्यवद्भुवि ।
सुमेरु नाकान्तर मस्ति यत्स्थलं ब्रध्नस्य तद्विष्टप मुत्तमं विदुः ॥१५॥
"यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टयम् ।
स्वधा च यत्र तृप्तिश्च तत्र माममृत कृधि ॥" (ऋ०९।११३।१०)
स्वर्गस्य कश्चित् परमः प्रदेशोऽप्यन्यो भवेत् सर्वजनप्रसिद्धः ।
दूरोहणं यं ब्रुवते सहस्रेणाह्नामितोऽध्वास्य मतोश्वगम्यः ॥१७॥

(कुरुक्षेत्रम्)

सा यज्ञभूमि स्त्रिविधापि यावत् प्रान्ते कुरुक्षेत्र मुशन्ति तावत् ।
वितन्वते यज्ञ ममी हि देवा स्तस्मिन् कुरुक्षेत्र इति श्रुतं नः ॥१८॥ (शत०४।१।५)
यज्ञे मनुष्या नधिकारतः प्राक् त्वासीत् कुरुक्षेत्रमिदं द्यु रेव ।
प्राग् मेरुतो यावदुदक् समुद्रं कुरु प्रदेशः प्रथित स्ततोऽयम् ॥१९॥
तत् संजयः प्राग् धृतराष्ट्रमाहोत्तरान् कुरून् मेरुधरोत्तरांशे ।
वायोः पुराणे तु समुद्रतोऽर्वाग् वर्षं तृतीयं तदुदक् सुमेरोः ॥२०॥
"दक्षिणे न तु भीलस्य मेरोः पार्श्वेस्तथोत्तरे ।
उत्तराः कुरवो राजन् पुण्याः सिद्धनिषेविताः ॥२१॥" (महा०भी०अ०७)
पुरूरवा आयुरयं च पूर्वं गन्धर्वतोऽशिक्षित यज्ञविद्याम् ।
यदा तदा यज्ञ विधिर्मनुष्येऽप्यभूत प्रवृत्तः क्रमशः प्रवृद्धः ॥२२॥
कुरोस्तु राज्ञः समयेनृलोकेऽपीन्द्रः कुरुक्षेत्रमकारयत् तत् ।
सा यज्ञभूमिर्विहितानराणां सा देवभूमि र्हि कुरौ नियुक्ता ॥२३॥
ततः प्रभृत्येष कुरुः प्रसिद्धो द्विधाऽभवद् दक्षिण उत्तरश्च ।
स दक्षिणो यज्ञ कृते नराणां दिव्युत्तरास्ते कुरवः सुराणाम् ॥२४॥



७—मनुष्यदेवाः ।

देवाभिधाः सर्व इमे मनुष्या जातिर्नृणां काचन देव संज्ञा ।
देवेषु चावान्तरजातयोऽन्याः पित्रादयः काश्चन पूर्वमासन् ॥ १ ॥
आत्माद्विधा मानुष दैव भेदा दात्मास्वतः सिध्यति मानुषोयम् ।
यो जायते च म्रियते च नाना लोकान् परिक्रामति मानुषः सः ॥ २ ॥
दैवोऽन्य आत्माऽन्विह मानुष तं संपद्यते यज्ञजसंस्क्रियातः ।
हयं यथा सारथि रेव मात्मा दैवो वशे कर्षति मानुषत्वम् ॥ ३ ॥
आरूढ विज्ञात्मकृताऽपरात्मा द्व्यात्मोऽङ्कतज्ञः क्रमते तुरङ्गः ।
तथा स यज्ञात्मकृताऽपरात्मा द्व्यात्मा नरो देव इति प्रसिद्धः ॥ ४ ॥
÷ये चर्षयो ये पितरोऽथदेवाऽसुराश्च चत्वार इमे म यज्ञाः ।
आम्भस्य देवा अथयेऽत्र देवास्ते प्राणदेवा नुगमान्निरूढाः ॥ ५ ॥

देवासुराणां द्वादश महा संग्रामाः ।

एषां चतुर्णां सु समृद्धिभाजा मन्येऽनुगास्तत् परिचारकाश्च ।
बभूवुरेषा मुभयेऽनभन्त श्रैष्ठ्यं तु देवा असुराश्च वीराः ॥ ६ ॥
तेषां त्रिलोकी यतयस्तु देवा एवाभवन्नस्वसुरास्त्रिलोक्याम् ।
भेजुः स्वभागं तइमे समुद्रे पातालदेशेष्वखिलासु दिक्षु ॥ ७ ॥
देवा अमी बुद्धिमतांवरिष्ठा वीर्याधिकास्ते त्वसुरावलिष्ठाः ।
वीर्याधिकत्वात् तइमेत्रिलोक्या मपिस्वभागं परिलब्धुमैच्छन् ॥ ८ ॥
त्रैलोक्यमिद्राय ददौ विधाता गुरुर्महा मान्यवरोऽखिलानाम् ।
शेषास्तु सर्वाः क्षितयोऽसुरेभ्योऽनुलङ्घनीय विधिशासनं तत् ॥ ९ ॥
अन्यायवृत्त्योत्पतितुं प्रवृत्तास्वेतेषु युद्धाय समुद्यतेषु ।
देवासुराणामभवद्विरोधो मिथोऽभिमर्दा बहवो बभूवुः ॥१०॥

÷ यज्ञदेवाः = ऋषयः पितरः देवाः असुराः । निरूढदेवाः = प्राणदेवानुगताः ।

शताब्द पर्य्यन्तमिहोभयेषां विरुध्यतां घोरतराभिमर्दैः ।
आसन्नियुद्धानि बहूनि तेषां स्युर्द्वादशात्युग्रतया प्रसिद्धाः ॥११॥

युद्धं पुरात्रैपुरमान्धकारिकं हालाहलं चामृतमन्थनाभिधम् ।
वात्रं हिरण्याक्षवधोऽथतारका मयं तथाडीवक युद्धमुच्यते ॥१२॥

कोलाहलं च ध्वजयुद्ध संज्ञक तन्नारसिंहं बलिबन्धनं तथा ।
एभ्योऽवराण्यभवन् सहस्रशो युद्धानि देवा सुरयोः परस्परम् ॥१३॥

८—भौमस्वर्ग वासिनो देवाः ।

*अग्निश्च वायुश्च रविश्च चन्द्रश्चन्द्रोऽस्त्यथापो वरुणस्य लोकः ।
चन्द्रः पितृभ्यौः परमोऽथ चन्द्र द्वीपः समुद्रान्तरितो लघुः सः ॥ १ ॥

"उत्तराणां कुरूणां च पार्श्वे ज्ञेयं तु दक्षिणे ।
ससुद्र ऊर्मिमालाढ्यो नागासुर विभूषितः ॥ २ ॥
पञ्चयोजन साहस्रमति क्रम्यः सुरालयम् ।
चन्द्रद्वीप इति ख्यातश्चन्द्रमण्डल संज्ञितः" ॥३॥ (वायु०पु०)

अग्न्यादयोऽष्टौ वसवोऽथ रुद्रा एकादश द्वादश चादितेयाः ।
आपोऽङ्गिरोभि र्भृगुभिर्द्विसंस्था आपो हि ताः स्युः पितरो द्विरूपाः ॥ ४ ॥

* ब्रह्म अग्निःसंवत्सरः	वायुःमरुत्वानिन्द्रः	सूर्य्यःमघवानिन्द्रः	चन्द्रःब्रह्मणस्पतिः	चन्द्रः वैद्युतः
आदिदेवाः वसवः	रुद्राः	आदित्याः	अङ्गिरसः	भृगवः
पशवः	मरुतः	विश्वेदेवाः	विश्वेदेवाः	आपः
लोकाः १	२	३	४	५
स्तोमाः ९	१५	२१	२७	३३

तत्रावयोऽग्निः (११) परमस्तु विष्णुर्य (१२) आदितेयोऽस्ति तयोस्तु मध्ये ।
देवाः समस्ता निवसन्ति वाढं तावान् दिवो मुख्यतयोऽस्ति भागः ॥ ५ ॥

+दशलोकपालाः (१०) दिक्पालाः (१८) ।


आसँस्तु देवा वसवोऽथ (१) तद्वा (२) अथादितेया (३) मरुतश्च (४) भिन्नाः ।
प्राग्धर्म्महानात्तुषिता स्ततोऽन्ये साध्यादयः संस्कृति मित्थमागुः ॥ ६ ॥

प्रतिष्ठिताः सर्व इमे सु सभ्याः प्राग्यज्ञवेदेष्वभवन् प्रवीणाः ।
राज्याधिकारेषु सुशिक्षितास्ते लोक प्रशास्तृत्व पदान्यवायुः ॥ ७ ॥

÷तत्राग्निवायू (१) (२) अपि मृत्युमृत्युञ्जयावमी (३) (४) तूपदिशा (१) मधीशाः ।
विनैव राज्यं कृपयाविधातुः सभ्यत्वमायुः शिव एषु वर्य्यः ॥ ८ ॥


\+ १—ब्रह्मा = ज्ञानम्, वेदः, शिल्पम् ।
२—इन्द्रः = देवाः ।
३—अग्निः = आग्नेयाः ।
४—यमः = याम्याः पितरः ।
५—निर्ऋतिः = राक्षस वन्य चर्बरादयः ।
६—वरुणः = जलाशया यादांसि ।
७—वायुः = वायव्याः ।
८—कुबेरः = गन्धर्वाः सोमरक्षकाः ।
९—ईशानः = देवयोनयः ।
१०—विष्णुः = भूमेरधोलोकस्थाः ।

÷



+दिशामधीशास्तु गृहीत राज्या एवाभवन् राष्ट्रबलाभिपन्नाः ।
यमश्च सोमो वरुणस्तथेन्द्रस्तेषामपीन्द्रः प्रवरः स्वराट्त्वात् ॥ ९ ॥
राजा यमः प्राग्वरुणस्तु राजा सम्राट् स पश्चादपि सोम एवम् ।
यमे च सोमे प्रति पन्थिताऽसौ दन्योन्य मिन्द्रे वरुणे च धर्म्मात् ॥१०॥
यमस्य पक्ष्माः पितरो मनुष्याः गन्धर्वभेदास्त्विह सोम पक्ष्याः ।
ये चा सुरास्ते वरुणस्य पक्ष्या देवाचभूवुर्विश इन्द्र पक्ष्याः ॥११॥
पृथ्व्या यदूर्ध्वं न च पार्थिवं यत् नक्षत्र चन्द्रग्रह सूर्यगाऽर्थाः ।
ज्ञानानि वेदा अपि शिल्प भेदा ब्रह्मैव तेषामिह लोकपालः ॥१२॥
अन्तस्तु भूमेर्यदधश्च भूमेर्भू गर्भगा ये निधयः क्वचासन् ।
तेषामभूद्द्वादश आदितेयो विष्णुः समेषामिह लोकपालः ॥१३॥
अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रेभिरभि रक्षतुत्मना ।
इन्द्रो मरुद्भिर्ऋतुथाकृणो तु आदित्यैर्नो वरुणः संशिशातु ॥१४॥
एषां चतुर्णामपि दैवतानां मिन्द्रोऽभवत् संसदि लोकपालः ।
निरीक्षणेऽनुग्रह निग्रहादौ परीक्षणे चाधिकृतोऽयमासीत् ॥१५॥
आग्नेय वायव्यविधा अशेषा यावत्य एव प्रथिताः क्वचासन् ।
अग्निश्च वायुश्च सदेवभेदो बभूव तेषामिह लोकपालः ॥१६॥
ये राक्षसाः केचन येच वन्या ये बर्बराः प्रान्तनिवासिनोऽन्ये ।
हिंस्रा असभ्या अगृहा अमीषां मृत्युर्निर्ऋत कश्चन लोकपालः ॥१७॥
भूताधिनाथोऽखिलदेवयोनि ग्रामस्य लोकेश उमेश आसीत् ।
निरीक्षणेऽनुग्रह निग्रहादौ परीक्षणे सोधिकृतो बभूव ॥१८॥
गन्धर्व जातिर्द्विविधा कृतासीत्संगीतकौशृत्तिमतां शिवोऽभूत् ।
सिन्धोः प्रतीच्यां वसतां तु तु सोमाधिरक्षिणां लोकपतिः स सोमः ॥१९॥

+



प्रशासनाधिकारोऽयं द्वैविध्येन व्यवस्थितम् ।
बभूवुर्दशदिक्पाला लोकपालास्तथा दश ॥२०॥
पतिरिन्द्रस्तु पूर्वाय दक्षिणस्या यमः पतिः ।
पश्चिमायांस्तु वरुणः सोम उत्तर दिक्पतिः ॥२१॥
अग्निः प्राग् दक्षिणामीष्ट मृत्युर्दक्षिण पश्चिमाम् ।
पश्चिमोत्तरतो वायुदीशानः पूर्वसौम्ययोः ॥२२॥
जलाशया अत्र तु यावदासन् येकेच तेषामधिवासिनोऽग्रे ।
यादांसि यावान्ति च तेषु तेषां स लोकपालो वरुणो बभूव ॥२३॥
सैन्यं तु यन्मारुतमन्यदासीत् स्कन्दोऽभवत् सैन्यपतिस्तु तस्य ।
ऐन्द्रं तनुत्रं परिपार्श्वगामि प्रायस्तदिन्द्रेण सहैव याति ॥२४॥

९—भौम द्यवि षड् विभागाः ।

मेरो स्त्रयत्रिंश दिहोत्तरांशा द्यौरुच्यते तत्र वसन्ति देवाः ।
अंशा स्त्रयो ब्रह्म ततः षडंशैः स्युः पञ्चभिः पञ्च च देवलोकाः ॥ १ ॥

१०—सौरे दिव्यस्वर्गे पितृस्वर्गः ।

सुविस्तृतो दैवतलोक एष द्यौरुच्यते स्वर्गसमीप माहुः ।
तत्रर्षयस्ते पितरश्च देवा न्यूषुः पुरान्येऽपि च तिर्य्यगाद्याः ॥ २ ॥
लोका ऋषीणां न पृथग् दिविस्युः सर्वेषु लोकेषु यथेच्छमेते ।
विहारिणः पित्र्य जनेष्वनल्पा गन्धर्वलोकादिषु च न्यवात्सुः ॥ ३ ॥
पित्र्यो दैवश्चेति द्विविधः स्वर्गो विभक्त आसीत् सः ।
उभयत्रानुविभागा अन्येन्येऽनेकविधा विहिताः ॥ ४ ॥
नराः पुराऽऽसन् पितृजातिकाये तेषां निवासायजुषः प्रदेशः ।
राष्ट्रं च चन्द्राधिकृतं यदेषां स्वर्गः स लोकश्च मतः पितॄणाम् ॥ ५ ॥

*द्यौर्यावतीयं पितृभाग भुक्ता सोदन्वती पीलुमती च प्रद्यौः ।
जलादरण्यात् पुरसंनिवेशात् त्रेधोदिताऽथर्वणसंहितायाम् ॥ ६ ॥
उदन्वती द्यौः सह सागरासी दरण्यभूः पीलुमतीतिकल्पता ।
प्रद्यौः पुरग्राम निवासभूमि स्तदित्थमेषा त्रिविधापितृद्यौः ॥ ७ ॥
पितृलोके त्रिविभक्ते सोमसद् उदक् सनातने लोके ।
वैभ्राजेऽग्निष्वात्ता याम्येऽन्येऽन्तस्तु सोमपथ लोके ॥ ८ ॥
सन्तानक इति विभ्राजमान इति सोमपद मिति वा ।
लोकानां पृथगेषां संज्ञान्तर मुच्यते पूर्वैः ॥ ९ ॥
आद्या इत्थं त्रिविधाः पितरोऽन्ये ये चतुर्विधा स्तेषाम् ।
मारीचस्तेजस्वी ज्योतिर्भासश्च मानसो लोकः ॥१०॥
हविर्भुजोवाऽज्यप-सोमपा वा सुकालिनोवेति परे चतुर्धा ।
अन्नाद एतेऽग्निविधास्तु पूर्वे त्रयस्तदित्थं पितरोद्विधा स्युः ॥११॥
सोयं पितृस्वर्ग इह क्वचासी न्न शक्यते ज्ञातुमिदं यथावत् ।
मङ्गोलिया प्रान्तमशेषमेके लोकं पितृणां परिकल्पयन्ति ॥१२॥

११—सौरे दिव्यस्वर्गे पितृस्वर्गप्रापकाः पितृयाणमार्गाः ।

पितृयाणा दिविमार्गाः कतिचिच्छ्रुतिषु प्रदर्शिता स्तेषाम् ।
अधिदैवत मधिभूतं केऽपि समाः केऽपि भौम मात्रे स्युः ॥१३॥
पूर्वैः पितृस्वर्गकृतेऽधिदैवं प्रोक्ताश्चतुर्धा पितृयाणमार्गाः ।
नाड्योऽधराः लौकिकभद्रकर्म्मा वाचीन खं केऽप्यति वाहकाश्च ॥१४॥

१—(नाड्यः)

हृत्स्थान तो या विततास्तः शरीरे नाड्योहि ता नाम बहु प्रभेदाः ।
यास्ता स्वधस्तात् प्रचरन्ति ताभ्यो ह्युत्क्रान्त आत्मा पितृयाण मार्गः ॥१५॥

---

* "उदन्वती द्यौरुषमा पीलुमतीति मध्यमा । तृतीया तु प्रद्यौरिति यस्यां पितर आसते ॥

२—(कर्म्माणि)

अविद्य कर्म्मप्रवणा अयज्ञाः प्रजां धनं वा बहुकामयन्ते ।
इष्टे च पूर्त्ते च रताश्च दत्ते ते कर्म्मणास्युः पितृयाणमार्गाः ॥१६॥

३—(व्योम)

अगस्त्यत स्तूत्तरतोऽजवीथ्या यदक्षिणं व्योम ततो य आत्मा ।
उत्क्रम्य तेऽसौ पितृयाणमार्गात् संवत्सरे चान्द्रमसे प्रयाति ॥१७॥

४—(अति वाहिकाः)

धूमो निशा कृष्णदलं च याम्यायनं च संवत्सर एष चान्द्रः ।
एतेऽतिवाहाः स्युरतश्चतुर्थो स कृष्णमार्गः पितृयाण उक्तः ॥१८॥
यथाधिदैवं च तथाधिभूतं चत्वारएते पितृयाणमार्गाः ।
भूमौ पितृस्वर्गगता निरुक्ताश्चन्द्रोनृपो द्वारपतिश्च तेषाम् ॥१९॥

१२—सौरे दिव्यस्वर्गे सप्तदेव स्वर्गाः ।

द्यौर्यावती दैवतभागभुक्ता सापित्रिधाऽथर्वणगोपथोक्ता । (गोपथ०पू०५।१८)
त्रिविष्टपं च त्रिदिवस्त्रिनाक स्त्रयस्त उक्ता दिवि देवलोकाः ॥२०॥ (गो०उ०१।१)
लोकास्त्रयस्ते त्रिवृतः प्रसिद्धा स्त्रिविष्टपं भू स्त्रिदिवं भुवः स्यात् ।
त्रिनाकमेवं स्वरितित्रयस्तेऽग्निवायु सूर्य्यानुयन्ति लोका ॥२१॥
"तिस्रो भूमीर्धारयन् त्रींरुतद्यून् त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्य्यमन् वरुणमित्र चारु" ॥२२॥ (ऋ०२।२७।८)
त्रिविष्टपं दक्षिणतो हिमवःस्याद्धिमालयामन्नतरोत्तरस्थम् ।
तदुत्तरोऽयं त्रिदिवोथनाकस्तदुत्तरः सागरतोऽधरस्थः ॥२३॥
"येन ऋषयस्तपसा सत्र मायन्निन्धाना अग्निं स्वराभरन्तः ।
तस्मिन्नहं निदधे नाके अग्निं यमाहुर्मनवस्तीर्ण बर्हिषम्" ॥२४॥ (ऋ०)

"तं पत्नीभि रनुगच्छेम देवाः पुत्रैर्भ्रातृभि रुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधिरोचने दिवः" ॥२५॥ (ऋ०)
पृष्ठेदिवः प्रत्नविधस्य नाकस्यारोहणं ताण्ड्य महर्षिराह ।
तेनास्य नाकस्य पुरातनत्वं प्रतीयते च त्रिदिवोत्तरत्वम् ॥२६॥
मध्ये य एष त्रिदिवस्तृतीया याः सन्ति तिस्रो दिव आसुमध्याः ।
यमाधिकारे पितृलोक भुक्ता स्थिते उपस्थे सवितुः परे द्वे ॥२७॥
"तिस्रो द्यावः, सवितु र्द्वाउपस्थाँ, एकायमस्य भुवने विराषाट् ।
आणिं न रथ्य ममृताधितस्थु रिह ब्रवीतु य उ तच्चिकेत" ॥२८॥ (ऋ०१।३५।६)
द्यौर्विष्टपं नाक इमे त्रिपृष्ठास्त्रयोविभागा उदिताः खलुद्यौः ।
योऽन्ये त्रयस्त्रिष्वपि तेषु भागाः पृष्ठानिपर्यन्तभुवः स्यु रेषाम् ॥२९॥
धरातलं पृष्ठमिति प्रतीमः सुविस्तृतं प्रान्तविशेष मुच्चम् ।
यन्प्रेरुपृष्ठं यदु नाकपृष्ठं वदन्ति तत्तस्य धरातलं स्यात् ॥३०॥ (ग०पृ०२२)

दिव्यस्वर्गे च भौमस्वर्गे च सप्त देवलोकाः ।

सामान्यतोऽयं तु विभाग उक्तस्तदन्तरे देव विशेष वासात् ।
सप्त प्रदेशा अभवन् विभक्ता कौषीतकादि श्रुतिषु प्रसिद्धाः ॥३१॥
[1]आपोदकः स्याद् [2]ऋतधाम नामाऽपराजितोऽन्योऽस्ति परोऽस्ययद्यौः ।
[4]प्रद्यौ स्तथा [6]रोचन एतदन्तर्नाकोऽन्ततः स्यादिति देवलोकाः ॥३२॥
स्या[1]ग्निलोकोऽथ च वायु[2]लोकः स्यादिन्द्र[3]लोको वरुणस्य लोकः ।
स्यान्मृत्यु[5]लोकोऽथ च ब्रह्म[6]लोको यद्वै परंधाम स नाक[7]लोकः ॥३३॥

त्रिविष्टपम् = त्रिणाचिकेतः	त्रिदिवः	त्रिणाकः
१-अपोदकः = अग्निलोकः	४-अद्यौः = वरुणलोकः	३ ..... नाकः
२-ऋतधामा = वायुलोकः	-प्रद्यौः = मृत्युलोकः	प्रत्न नाकः
३-अपराजितः = इन्द्रलोकः	६-रोचनः = ब्रह्मलोकः	नाकः

उत्क्रान्ति विद्यासु यथाग्निवाय्वादित्येभ्य ऊर्ध्वं वरुणस्य लोकः ।
प्रजापतेर्ब्रह्मण एतदूर्ध्वं नाकस्तथेहापि समं प्रविद्यात् ॥३४॥
एषां केचित्त्रय इह त्रिष्टपसंज्ञा स्त्रयो द्यु[२] संज्ञाः स्युः ।
नाकः[३] सप्तम इत्थं सप्त हि लोका स्त्रयश्च ते लोकाः ॥३५॥
ब्रह्मस्य यद्वत्रिष्टप मेतदासी दायित्वलोकः प्रथितोऽथ तस्य ।
पूर्वोत्तरस्यां दिशि सन्निविष्टाऽपराजिता द्यौ रय सिन्द्रलोकः ॥३६॥ (गo पृo २२)

१३—देवस्वर्ग प्रापकाश्चतुर्विधाः देवयान मार्गाः ।

अर्य्यमवरुणौ देवयान मार्गस्याध्यक्षौ ।

(दिव्यस्वर्गे देवस्वर्गप्रापका दिव्या देवयान मार्गाः)

*त्रित्वा दिव स्त्रीन् किल देवयानान् कृष्णं यजुर्गोपथकं च वक्ति ।
त्रिविष्टपस्य त्रिदिवस्य नाक स्यान्योन्य आसीत् पृथगेव पन्थाः ॥ १ ॥
स्वर्गाय दैवाय परेऽधिदैवं विदुश्चतुर्धापि च देवयानान् ।
नाड्योपि विद्यान्वित यज्ञकर्म्माप्युदग् विय च्याप्यति वाहि देवाः ॥ २ ॥
हृत्स्थानतो या अधरोर्ध्व नाड्य स्तता स्तनौ सन्ति हि ताहि तासु ।
या श्वक्षुरादि प्रसृतोर्ध्वनाड्यस्ताभ्यो गताः स्युः पथि देवयाने ॥ ३ ॥
प्राक् सौमिका येऽपिच सौमिकाये यज्ञास्ततः सिद्ध्यति दैव आत्मा ।
उत्क्रम्य देवान् दिवि स प्रयायात् तस्यैष मार्गो दिवि देवयानः ॥ ४ ॥
"देवा यज्ञमृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञायुधानि ।

---

* "विद्वानग्नेऽध्वनो देवयानान्"—(७।७२।१) । (७।७६।२) । (८।३८।७) । (१०।८८।१५) (१०।१०६।२) ।

+तेभिर्याहि पथिभिर्देवयानै रीजनाः स्वर्गं यन्ति लोकम्" ॥ ५ ॥ (अथ० १८।४।२)
"यज्ञ एति विततः कल्पमान ईजान मभिलोकं स्वर्गम् ।
तमग्नयः सर्वहुतं जुषन्तां प्राजापत्यं मेध्यं जातवेदस" ॥ ६ ॥ (अथ०१८।४।१३)
"ईजानश्चित मारुक्ष दग्निं नाकस्य पृष्ठादिव प्रुत्पतिष्यन् ।
तस्मै प्रभाति नभसो ज्योतिषीप्रान् स्वर्ग्यः पंथा सुकृते देवयानः॥७॥(अ०१८।४।१४)
"ये अग्नयः शशमानाः परेयुर्हित्वा द्वेषां स्पनपत्यवन्तः ।
ते द्या मुदित्या विदन्नलोकं नाकस्यपृष्ठे अधिदीध्यानाः" ॥८॥ (अ०१८।२।४७)
सप्तर्षितो दक्षिणमुत्तरं स्या यन्नागवीथ्या इदमान्तरं खम् ।
स्याद्देवयानस्तत एष गच्छन्नात्मादिवं याति च देवलोकान् ॥ ९ ॥
सप्तर्षयो वाथ प्रजापतिर्वा ब्रह्मामृतं वा दिवि यत्र यत्र ।
तद्देवयानात् क्रमते, चतुर्धा ते देवयाना इति वायु राह ॥१०॥
"अष्टाशीति सहस्राणि ऋषीणा मूर्ध्वरेतसाम् ।
स्मृतं तु तेषां तत्स्थानं तदेव गृहवासिनाम् ॥११॥ ८॥१८५॥
सप्तर्षीणां तु यत्स्थानं स्मृतं तद्वै दिवौकसाम् ।
प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मणः क्षयः ॥१२॥ ८॥१८६॥
योगिना ममृतं स्थानं नानाधीनां न विद्यते ।
चत्वार एते पन्थानो देवयाना विनिर्म्मिताः ॥१३॥ ८॥१८७॥
पन्थानो देवयानामे तेषां द्वारं रविः स्मृतः ।
तथैव पितृयाणानां चन्द्रमा द्वारमुच्यते' ॥१४॥ ८।१८८ ॥
(वायु० पु० पू० अध्या० ८ श्लो० १८५-१८८)

मनुष्य लोकस्त्वयमग्निलोकः प्रेतस्ततो वायुमुपैति तस्मात् ।
आदित्य मायाति ततः स चन्द्रं गत्वा ततौऽशोकमहिम्नि याति ॥१५॥

+ "विप्रामध्वः पिवत तृप्ता यातपथिभिर्देवयानैः" (८।३८।७) "पथोरक्षधियाकृतान्"(६।५३।१०) "ब्रह्मचार्य्येतिसमिधा समिद्धः कार्ष्णंवसानो दीक्षितो दीर्घश्मश्रुः । स सद्यएति पूर्वस्मादुत्तरं समुद्रलोकान् संगृभ्यमुहुराचरिक्रत" (अथ) "त्रयोवैदेवयानाः पन्थानः" ॥

अर्चींष्यहः शुक्लदलोत्तरायणे संवत्सरं वायुमथीन्द्रमप्यथ ।
सोमं च विद्युद्व वरुणेन्द्र माप्य स प्रजापतिं गच्छति देवयानतः ॥१६॥
संवत्सरान्तोऽस्ययमग्निलोकोऽथादित्य लोको वरुणेन्द्र लक्ष्मा ।
सोमश्च विद्युच्च स सोमलोकः कामप्रलोक स्त्रिभिरुत्तरैः स्यात् ॥१७॥
स्यादग्निलोकोऽर्चि रथाहरादिं वाञ्छन्त मिच्छन्ति तु वायुलोकम् ।
परे यद्ध्वं क्षितितो दिवोऽर्वाक् तदन्तरिक्षं स हि वायु लोकः ॥१८॥
अथाप्यनन्ता इह देवयाना आनन्त्यताऽत्र प्रयतां पृथग्वत् ।
यथाधिदैवं च तथाधिभूतं ते देवयाना बहुधा प्रकल्पताः ॥१९॥

भौमस्वर्गे देवस्वर्ग प्रापका भौमा देवयान मार्गाः ।

त्रिविष्टपस्य त्रिदिवस्य नाक स्यान्योन्य आसीत् पृथगेव पन्थाः ।
तेन त्रयः सन्ति हि देवयानाः कृष्णं यजुर्गोपथ मेव माहु ॥ १ ॥
"ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।
इत्थं दैवीवाग् ब्रवीतीति कृत्वा चत्वार स्ते देवयाना भ्रियन्ते" ॥ २ ॥
ये चत्वारो देवयानाः प्रधाना स्तेषां शाखाः सन्ति बह्व्यः सरण्यः ।
तस्मादन्ये चर्षयः प्राहुरेषां नानात्वं चाप्यर्यमा धिष्ठितत्वम् ॥ ३ ॥
"चत्वार ईं विभ्रति क्षेमयन्तो दशगर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ॥ ४ ॥"
"जजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उखो विश्वतः सीं परिद्यावा पृथिवी यन्ति पन्थाः ॥५"॥ (ऋ०५।३।१)
"ये पन्थानो बहवो देवयाना अन्तरा द्यावा पृथिवी संचरन्ति ।
ते माजुषन्तां पयसा घृतेन यथा क्रीत्वा धन माहराणि ॥६॥" (अथ०३।१५।१)
"ये पन्थानो बहवो देवयाना अन्तरा द्यावा पृथिवी सञ्चरन्ति ।
तेषा मज्यानिं यतमो वहान्ति तस्मै मा देवा परिधत्तेह सर्वे ॥७॥" अथ.६।६।५५)

"ये तेऽर्य्यमन् बहवो देवयानाः पन्थानो राजन् दिव आचरन्ति ।
तेभि र्नो देव महि शर्म्म यच्छ ॥ ८ ॥" (कृ०य०)
पयोघृतानां क्रयविक्रयाभ्यां धनानि लोका इह देव याने ।
उपार्जयन्ति स्म पुरा बहूनीत्याथर्वणान्मन्त्रगणात् प्रतीमः ॥ ९ ॥
वसिष्ठ एतान् वसुभिः परिष्कृतान् दृष्ट्वा पथोऽक्लिन्नविधान्यरूपयत् ।
शुक्ला इमे तेन दिवैव तद्गमो रात्रौ तु यात्रा प्रतिषेधएष्वभूत् ॥१०॥
तमर्थमित्थं स जगाद सायं हर्म्म्याणि यात्रान्त कृते कृतानि ।
प्रातः पुरस्तादुषसो विधातुं यात्रां च विज्ञापनमस्ति शब्दैः ॥११॥
"प्रेम पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभि रिष्कृतासः ।
अभूदुकेतु रुषसः पुरस्तात प्रतीच्यागादधि हर्म्मेभ्यः ॥१२" (ऋ०१०।७६।२)
"परं मृत्यो ! अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजां रीरिषो मोतवीरान् ॥१३॥
(तै.ब्रा.३।७।१४। ऋ० १०।१८।१)

इति श्रुतेः केचन देवयानात् पन्थान मन्यं पितृयाणतश्च ।
तृतीय माहुर्न तदस्ति युक्तं चतुर्षु पित्र्येष्वयमेक आसीत् ॥१४॥
"द्वे सृती अशृणवं पितृणा महं देवाना मुत मर्त्यानाम् ।
ताभ्या मिद विश्वमेजत् समेति यदन्तरा पितरं मातरञ्च" ॥१५॥
इति श्रुते मर्त्य गतिप्रभेदाद् द्वावेव मार्गौ दिवि सन्निविष्टौ ।
दैवेऽन्य एत्यन्य उतेति पित्र्ये स्वर्गे तयोः सन्ति हि भूरि भेदाः ॥१६॥
इतः प्रयातस्य हि यत्र मार्गे दैवस्य पित्र्यस्य पथः पृथक्त्वम् ।
तत्रावरोधं हि दिवः प्रकुर्वन् सरोऽन्तिकस्थो यमराज आसीत् ॥१७॥
"यत्र राजा वैवस्वतो यत्रा वरोधनं दिवः ।
यत्रा मूर्ह्यहतीराप स्तत्र माममृतं कृधि ॥१८॥ (ऋ०९।११३।८)
अथापिवा तत्र पथोः पृथग्वत् संरक्षकौ स्तो वरुणो यमश्च ।
स देवयाने वरुणो नियुक्तो यमो नियुक्तः पितृयाण आसीत् ॥ १९ ॥

"प्रेहि प्रेहि पथिभिः पूर्य्याणैर्येना ते पूर्वे पितरः परेताः ।
उभा राजानौ स्वधया मदन्तौ यमं पश्यासि वरुणं च देवम् ॥२०॥ (अथ१८।१।५४)
मदुवार्य्यमासौ वरुणश्च देवौ संरक्षकौ देवपथस्य कल्प्तौ ।
यमश्च चन्द्रः पितृयाणमार्गे संरक्षकौ द्वाविति निश्चितोऽर्थः ॥ २१ ॥
यमः स्वमार्गे परिरक्षणाय द्वौ कुक्कुरौ प्रेतनरेक्षितारौ ।
श्यावाङ्ग मन्यं शवलाङ्ग मन्यं न्ययुङ्क्त लोकत्रितये श्रुतौ तौ ॥ २२ ॥
"यौ ते श्वानौ यमरक्षितारौ चतुरक्षौ पथीष्ठौ नृचक्षसा ।
ताभ्यां राजन् परिधेह्येनं स्वस्त्यस्मा अनमीवं च धेहि" ॥२३॥ (अथ२१।१८।२।१२)
"अतिद्रव श्वानौ सारमेयौ चतुरक्षौ शबलौ साधुना पथा ।
अधा पितॄन् सुविदत्रा अपीहि यमेन ये साधमादं मदन्ति" ॥२४॥ (अथ०)
"द्वौ श्वानौ श्याव शबलौ वैवस्वत कुलोद्भवौ ।
ताभ्यामन्नं प्रयच्छामि स्यातामेतावहिंसकौ" ॥ २५ ॥ (इति स्मृति)
या द्यौ रथो ये दिवि देवयाना ये देवलोका अथयेऽत्रदेवाः ।
देवासुरख्याति विधौ त एते प्रदर्शिताः सन्ति विशिष्य सर्वे ॥२६॥

१४—भौमस्वर्गे सुधर्मा सभायां दशदिक्पालाः शासनव्यवस्थापकाः ।

... ...
... ...
... ...
... ...

१५—प्रजाशासने प्रजाभ्यो राजकीया अन्नदानादि व्यवस्था ।

... ...
... ...
... ...
... ...

१६—अन्नवस्त्रादि नगर व्यवस्था ।

... ...
... ...
... ...
... ...

१७—प्रेषितेभ्यः स्वर्णरेभ्यो गृहव्यवस्था ।

....
....
....
....

१८—मार्गेषु यातॄणां सायं प्रातर्यातायात व्यवस्था ।

... ...
... ...
... ...
... ...

१९—स्वर्गं गन्तॄणां सौधन्वन्निर्मितानि विमानादीनि आदिष्टोपयोज रूपाणि शिल्पानि ।

... ...
... ...
... .
... ...

२०—सावित्र—वारुणभेदात्स्वर्गे दुदुभुत द्वै विध्यम् ।

स्वर्गे प्रदिष्टा बहवोऽद्भुतार्थास्तेषु द्वय मुख्यतमं प्रसिद्धम् ।
सावित्र एकस्त्विह पृश्नरश्मा प्रेङ्खः परो वारुण एष आसीत् ॥१॥

२१—अश्मा पृश्निः । धरुणः ।

ध्रुवादतः पञ्चदशांशपृष्ठे द्वाविंशतोऽर्वागिह योऽस्ति देशः ।
ब्रध्नस्य तं विष्टपमाहु रश्मा पृश्निः स्थितः सप्तदशेऽत्रचांशे ॥
"उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुराविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ" ॥ (ऋ० ५.४७।३)
"दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्य्येति विश्वतः ।
सेमे मही रोदसी यक्षदा वृता समीचीने दाधार समिषः कविः" ॥ (ऋ०)
"स्कम्भोदाधार द्यावा पृथिवी उभे इमे स्कम्भो दाधारोर्वन्तरिक्षम् ।
स्कम्भोदाधार प्रदिशः षडूर्वीः स्कम्भ इदं विश्वं भुवनमाविवेश" ॥ (ऋ०)
ध्रुवादयं सप्तदशांशदेशे चतुष्पथे भाग चतुष्टयस्य ।
प्रज्ञापक स्तिष्ठति पृश्निरश्मा विभास्वरो भास्कर बिम्बरूपः ॥
स्कम्भो विशाला धरुणा भिधः पृथुस्तस्यो परिष्टात् वितुर्महारथः ।
तत्रान्तरिक्षोत्पतिताङ्घ्रयो हया ज्योतिर्मयं भास्कर मण्डलं रथे ॥
"विजना ञ्छ्यावाः शितिपादो अख्यन् रथ हिरण्य प्रउगं वहन्तः ।
शश्वद्द विशः सवितुर्दैव्यस्योपस्थे विश्वाभुवनानि तस्थुः" । (ऋ० १।३५।५)
चतुर्षु पार्श्वेषु च तस्य सक्ता उक्षा समुद्रो अरुषः सुपर्णः ।
उक्षा दशस्तोय हृदः समुद्रः पक्षीसुपर्णोऽत्र शिलामयः स्युः ॥
"नाके सुपर्णमुपयत् पतन्तं हृदावेनन्तो अभ्यचक्षत त्वा ।
हिरण्य पक्षं वरुणस्य दूतं यमस्य योनौ शकुन भुरण्यम्" ॥
(तै० ब्रा० का० प्र० अ० २।५।८)

"त्रीन् समुद्रान् समतृपत् स्वर्ग्यानपांपतिर्वृषभ इष्टकानाम् ।
पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥
"नैतावदेना परो अन्यदस्ति उक्षासो द्यावा पृथ्वी बिभर्त्ति ।
त्वचं पवित्रं कृणुतस्वधावान् यदीं सूर्यं न हरितो वहन्ति ॥ (ऋ० ८।३१।१०)

उक्षा ।

१-(१-११) २-(१८-३३)
अग्निः पुरस्तात् पृथिवी विभागः सोमः मरस्तादिति सद्यभागः ।
द्यावा पृथिव्यौ दिवि ते पृथक् स्त स्तयोर्व्यवस्थां कुरुते स उक्षा ॥ १ ॥
घोरेऽन्धकारेऽन्नमदन् स उक्षा ज्योतिः पवित्रां कुरुते त्वचं स्वाम् ।
तृतीयपादो न विशिष्यगम्योऽस्फुटौ पवित्र स्वधयोः पदार्थौ ॥ २ ॥
ऋक् संहितायां नवमे तु मण्डले वाक्यानि पश्यामि यथा बहूनि हि ।
तेभ्यो यथा वेद्मि तथा प्रदर्शयन् ब्रवीमि वाक्यानपि तानि कानिचित् ॥३॥
पवित्रमाहुः खलु वारमव्यं सुमज्जितं सोमरसः स्रुतोऽस्मिन् ।
पूतोभवत्यत्र सुसज्जितामीदव्येन वारेण वृषत्वगेषा ॥ ४ ॥
हयाधिरूढोत्तम सोममूर्ध्वं यन्त्रोदरायाः स्वधयांशुमत्याः ।
निष्पीडिताः सोमरसाः क्षरन्ति त्वच्यत्र पूतास्त्वदधः समुद्रे ॥ ५ ॥
अधिश्रितः सोऽत्र समुद्रियोर्मौ प्रलीयते तत्रगतैर्हि देवैः ।
इन्द्रस्य वायोरपि निष्कृतोऽस्मान् सिन्धारये सोमरसोऽस्ति पेयः ॥ ६ ॥

१—"दिवो नाभा विचक्षणोऽव्यो वारे महीयते ।
सोमो यः सुक्रतुः कविः । (९ । १२ । ४) ॥ ७ ॥
२—सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
वायो रिन्द्रस्य निष्कृतम् । (९ । १३ । १) ॥ ८ ॥
३—परि प्रासिष्यदत् कविः सिन्धोरूर्मा वधिश्रितः ।
कारं बिभ्रत् पुरुस्पृहम् । (९ । १४ । १) ॥ ९ ॥

४—एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः ।
विश्वा धामान्याविशन् । (६।२८।२) ॥ १० ॥
५—एष सूर्येण हासते पवमानो अधिद्यवि ।
पवित्रे मत्सरो मदः । (६।२७।५) ॥ ११ ॥
६—समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
सोमः पवित्रे अस्यस्युः । (६।२।२५) ॥ १२ ॥
७—अरुषो जनयन् गिरः सोमः पवत आनुषक् ।
इन्द्रं गच्छन् कविक्रतुः । (६।२५।५) ॥ १३ ॥

व्योम्नः समुद्रात्तु यथैष सोमो देवासुराभ्यां मथितः पृथिव्याम् ।
रसात्मनाऽऽप्यात्यमृतं तथोर्व्यां कल्पते समुद्रेऽमृत मुद्भृतं प्राक् ॥ १४ ॥
कल्पात् समुद्रादमृतोद्भृति र्यथा सोमादभूत् प्रक्रियया तया पुनः ।
महासमुद्राहितसोमतोऽमृतं निर्मथ्य नेतुं विबुधाः प्रयेतिरे ॥ १५ ॥

अरुषः ।

वीरस्य चन्द्रस्य हयाधिरूढा शिलामयी मूर्तिरिहारुषः स्यात् ।
गाः संहरद्भिः पणिभिर्नियुद्धे शौर्यं कृतं स्मारयतीव तेन ॥ १ ॥
स चारुषश्चन्द्रमसो हयः श्रुतावनेकधोक्तो नवमे तु मण्डले ।
विष्टम्भरूपे धरुणेऽश्मनि त्वयं ससक्त उक्तः सहितः परैस्त्रिभिः ॥ २ ॥

"सिंहं सन्त मध्वो अयासं हरिमरुषं अस्म पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परियात्युक्षा" ॥(ऋ० ६।८६।३)
"चतस्र ईं घृतदुह सचन्ते समाने अन्तर्धरुणे निषत्ता ।
ता ई मर्षन्ति नमसा पुनाना स्ता ईं विश्वतः परिषन्ति पूर्वीः" ॥ ऋ. ६।८६।५)
"विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।
असत् त उत्सो गृणते नियुत्वान् मध्वो अंशु पवत इन्द्रियाय" ॥ (६।८६।६)

"स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सु दक्षो विष्टम्भो दिवो धरुणः पृथिव्याः" ॥(९।८७।२)

२२—प्रेङ्खः ।

प्रेङ्खं विचित्रं वरुणः प्रचक्रे तत्रैकतो द्यौ रचिता त्रिपृष्ठा ।
तथाऽन्यतो भूमिरियं त्रिपृष्ठा पृष्ठानि तूर्ध्वाधरसंहितानि ॥ १ ॥
प्रत्येकपृष्ठेऽध्युपरा शिलाभिः प्रेङ्खप्रतीघातकृते कृताःस्युः ।
द्यावापृथिव्योरनयो स्तु मध्ये समुद्र आसाद्य रचितो गभीरः ॥ २ ॥
प्रेङ्खस्तु नौकामय एष बद्धः स्तुभिः समुद्रे निहितः सदास्ते ।
तासूपरासु प्रतिहन्यमाना पर्य्यायतो याति दिवं भुवं नौः ॥ ३ ॥
भूपृष्ठतो नौरुपसृप्य सिन्धौ सोर्ध्वा दिवं यात्युपगाहता त्रिः ।
प्रेङ्खोऽतनोन्मोदमाधिष्ठितानां महाद्भुतं तद् वरुणस्य कर्म्म ॥ ४ ॥
स्वर्गं वसिष्ठस्तु गतः कदाचित् स्तुत्वा प्रसन्नं वरुणं चकार ।
स्वयं स राजा वरुणो वसिष्ठं तां नावमारोहय दस्य तुभ्यै ॥ ५ ॥
प्रत्यक्षदर्शी वरुणेन सार्द्धं नावं समारुह्य वसिष्ठ एताम् ।
न्यरूपयत् प्रेङ्खमिमं स्वदृष्टं यथा तथैतत् परिदर्शयामि ॥ ६ ॥
"तिस्रो द्यावो निहिता अन्तरस्मिन् तिस्रो भूमीरुपराः षड्विधानाः ।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्मयं शुभेकम्" । (७।८७।५) ॥ ७ ॥
"आयद्रुहाव वरुणश्च नावं प्रपद्य समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प प्रेङ्ख इं खया वहै शुभेकम्" ।(७।८८।३) ॥ ८ ॥
"वसिष्ठं ह वरुणो नाव्याधाद् ऋषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रःसुदिनत्वे अह्नां यानुधाव स्ततनद् यादुषासः" ।(७।८८।४) ॥ ९ ॥

२३—भौमस्वर्गे अरालसमुद्रे महीसागरे च समुद्रमन्थनमहारम्भः ।

... ...

... ...

... ...

४२—देवस्थानस्यासुरैर्विजितत्वात् तुरुष्कस्थानत्वम् । (तातारतारतरी)

यद् ब्रह्मणो विश्वगुरोः पवित्रं स्थानं पुरासीदखिलाश्च देवाः ।
यत्रावसन् तद्धयसुरैस्तुरुष्कस्थानं कृतं ते विजिताश्च देवाः ॥ १ ॥
स्थानभ्रष्टाः देशदेशे परागुर्धर्म्मभ्रष्टा म्लेच्छधर्म्मानगृह्णन् ।
यज्ञभ्रष्टास्ते मनुष्यत्व मायन् देवाः सर्वे हीनतामित्थमापुः ॥ २ ॥
पाश्चात्याः केप्याहुरस्मिन् पुरात्वेऽवश्यायानां भूरिशोऽभूत् प्रपातः ।
तस्माद्धेतोस्तत्र देवा विखिन्ना वासस्थानं तत्यजुः प्रत्नमेतत् ॥ ३ ॥

॥ इति स्वर्गसन्देशः ॥

समाप्तः

पण्डित शास्त्री शोध
पुस्तक संख्या
दिनांक

शुद्धिपत्रम् ।

—०:❀:०—

पृष्ठ	पंक्ति	अशुद्धपाठाः	शुद्धपाठाः
१	६	बिष्णवग्नि	विष्णवग्नि
,,	६	सोऽय	सोयं
,,	१४	असृजत	असृजत्
,,	२०	तंनास्ति	तेनास्ति
३	३	स्वयंभु	स्वयंभू
,,	४	पारमेष्ठ्यो	पारमेष्ठ्यो
,,	६	,,	,,
४	१०	हृदयादुक्थत्	हृदयादुक्थात्
,,	११	सहस्रंताः	सहस्रांताः
,,	२३	स्वरिय	स्वरियं
,,	२४	द्यौरित्थ	द्यौरित्थं
५	१	द्योलोको	द्यौर्लोको
,,	३	निबिडत्वं	निबिडत्वं
६	१२	देवयजमन्	देवयजनम्
,,	१३	ब्रह्मन्थ	ब्रध्नस्य
,,	१५	यानदील्यारव्यया	यानदील्याख्यया
७	२	तत्रेव	तत्रैव
,,	३	पार्श्वयो	पार्श्वयो
,,	६	तजु०	यजु०
,,	१५	यज्ञविघातिन	यज्ञविघातिनं
८	१५	पुतिः	युतिः
६	१०	योजकोऽन्नज्योतिर्म्मयः	योजकोऽन्तज्योतिर्म्मयः
,,	२३	अचिष्यह	अचिष्यहः
१०	३	ब्रह्मस्य	ब्रध्नस्य

पृष्ठ	पंक्ति	अशुद्धपाठाः	शुद्धपाठाः
१०	४	पृश्निरश्माः	पृश्निरश्या
१५	२	वाढं	बाढं
,,	५	तद्रा	रुद्रा
१६	५	पद्माः	पद्याः
,,	२१	जातिद्विविधा	जातिर्द्विविधा
,,	,,	संगीतकौ	संगीतकै
१७	३	पूर्वाय	पूर्वाया
,,	४	पश्चिमायांस्तु	पश्चिमायास्तु
,,	६	वायुदीशानः	वायुरीशानः
,,	२१	निवासयजुयः	निवासयतुयः
१८	६	चतर्विधाः	चतुर्विधा
२१	६	सिन्द्रलोकः	मिन्द्रलोकः
२२	३	जातवेदस	जातवेदसः
,,	१८	देवयानामे	देवयानाये
,,	२२	ततौऽशोकमहिम्नि	ततोऽशोकमहिम्नि
२३	४	कामप्रललोक	कामप्रलोकः
,,	६	देवर्स्ग	देवस्वर्ग
,,	१५	धिष्ठितत्वम्	धिष्ठितत्वम्
,,	१६	विभ्रति	बिभ्रति
२४	५	न्यरूपयन्	न्यरूपयन्
,,	१६	अश्रृणावं	अश्रृणवं
२७	२	द्वय	द्वयं
,,	७	पूवस्य	पूर्वस्य
,,	६	स्कम्भोः	स्कम्भो
२८	३	विभर्ति	बिभर्ति
,,	६	मरस्तादिती	परस्तादिति

॥ इति ॥